# Shri Bala Namasmaranapurvakasvarupa DhyAnam

# શ્રીબાલાનામસ્મરણપૂર્વકસ્વરૂપધ્યાનમ્

## Document Information

Text title : bAlAnAmasmaraNapUrvakasvarUpadhyAnam

File name : bAlAnAmasmaraNapUrvakasvarUpadhyAnam.itx

Category : devii, dashamahAvidyA, devI, dhyAnam

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાનામસ્મરણપૂર્વકસ્વરૂપધ્યાનમ્

કલ્યાણી ત્રિપુરા બાલા માયા ત્રિપુરસુન્દરી ।
સુન્દરી સર્વસૌભાગ્યવતી હ્રીઙ્કારરૂપિણી ॥ ૧॥

ઐઙ્કારી સર્વજનની ક્લીઙ્કારી પરમેશ્વરી ।
સૌઃકારી સર્વશક્ત્યાઢ્યા ત્ર્યક્ષરી દિવ્યગન્ધિની ॥ ૨॥

સંવિદાનન્દલહરી શ્રીવિદ્યા ત્રિપુરેશ્વરી ।
ગુપ્તા ગુપ્તતરા નિત્યા નિત્યા ષોડશકાવૃતા ॥ ૩॥

ભક્તાનુરક્તા રક્તાઙ્ગી શિવા સર્વારુણા શુભા ।
મોહિની પરમાનન્દા કામેશી તરુણી કલા ॥ ૪॥

પદ્માવતી ભગવતી પદ્મરાગકિરીટિની ।
રક્તવસ્ત્રા રક્તભૂષા રક્તગન્ધાનુલેપના ॥ ૫॥

સૌગન્ધિકમિલદ્વેણી મન્ત્રિણી મન્ત્રપુષ્પિણી ।
તત્ત્વાસના તત્ત્વમયી સિદ્ધાન્તઃપુરવાસિની ॥ ૬॥

શ્રીવાણીડ્યા મહાદેવી કૌલિની પરદેવતા ।
કૈવલ્યરેખા વશિની સર્વેશી સર્વમઙ્ગલા ॥ ૭॥

નારાયણી વેદવેદ્યા સર્વસમ્પત્પ્રદા સતી ।
ચતુર્ભુજા ચન્દ્રચૂડા પુરાણાગમબોધિતા ॥ ૮॥

ભૂતેશ્વરી ભૂતમયી પઞ્ચાશદ્વર્ણરૂપિણી ।
સર્વમઙ્ગલમાઙ્ગલ્યા કામાક્ષી કામદાયિની ॥ ૯॥

કિઙ્કરીભૂતગીર્વાણી સુધાપાનવિનોદિની ।
આધારવીથીપથિકા સ્વાધિષ્ઠાનસમાશ્રિતા ॥ ૧૦॥

મણિપૂરસમાસીના અનાહતનિવાસિની ।
વિશુદ્ધિચક્રનિલયા આજ્ઞાચક્રનિવાસિની ॥ ૧૧॥

અષ્ટત્રિંશત્કલામૂર્તિઃ સુષુમ્નાગારમધ્યગા ।
યોગીશ્વરમુનિધ્યેયા પરબ્રહ્મસ્વરૂપિણી ॥ ૧૨॥

દિક્પાલશક્તિસંયુક્તા સર્વાશાપરિપૂરકા ।
અનઙ્ગકુસુમાદીડ્યા વાગ્દેવ્યષ્ટકસંવૃતા ॥ ૧૩॥

સર્વસૌભાગ્યદેશાની માત્રષ્ટકસમાવૃતા ।
ભૈરવષ્ટકસંસેવ્યા સર્વાભીષ્ટાર્થસાધિકા ॥ ૧૪॥

યોગિનીષટ્કસંસેવ્યા સર્વરક્ષાકરાધિપા ।
રતિપ્રીતિવિજયાખ્યત્રિશક્તિગુરુસેવિતા ॥ ૧૫॥

સર્વસિદ્ધિપ્રદેશાની સર્વાનન્દમયાધિપા ।
રહઃપૂજાસમાલોલા બિન્દુસ્થલમનોહરા ॥ ૧૬॥

ત્રિકોણમધ્યનિલયા ષટ્કોણપુરવાસિની ।
વસુપત્રદ્વયાવાસા ભૂપુરદ્વયમધ્યગા ॥ ૧૭॥

શિવકામેશ્વરાઙ્કસ્થકામેશ્વર્યઙ્કવાસિની ।
કામેશ્વરીસમાકારા ફુલ્લકલ્હારમધ્યગા ॥ ૧૮॥

પુસ્તકાભીતિવરદજપમાલાલસત્કરા ।
તરુણારુણદેહાભા દિવ્યાભરણભૂષિતા ॥ ૧૯॥

બન્ધૂકકુસુમપ્રખ્યા બાલલીલાવિનોદિની ।
કાશ્મીરકર્દમાલિપ્તતનુચ્છાયાવિરાજિતા ॥ ૨૦॥

સપર્યાચારનિરતગુરુમણ્ડલસેવિતા ।
ચતુર્વર્ગપ્રદાનોત્ક નિત્યકલ્યાણરૂપિણી ॥ ૨૧॥

એવં ધ્યાતા હૃદિ સદા પરામ્બા બાલરૂપિણી ।
દેવિ ! ભાગ્યવશાદત્ર સન્નિધત્સે ચિદાકૃતિઃ ॥ ૨૨॥

ઇતિ શ્રીબાલાનામસ્મરણપૂર્વકસ્વરૂપધ્યાનં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bala Namasmaranapurvakasvarupa DhyAnam*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*